# SSIP कार्यशालायाः वृत्तम्

षट्कसमन्विते युवमहोत्सवे ०९/१२/२०२१ तमे दिनाङ्के मध्याह्ने ०२ वादने योगभवने SSIP कार्यशाला अनुष्ठितासीत्। कार्यशालायामाध्यक्ष्यमलङ्कुर्वाणाः आसन् – विश्वविद्यालयस्य माननीयः प्रभारी कुलपतिः डॉ. ललितकुमारः पटेलः, मुख्यवक्ता– डॉ. जयेन्द्रसिंहः जादवः, विशिष्टातिथिः– श्रीजगदीशफोफण्डी, विशेषोपस्थितिः आसीत् – श्रीबी.जी.चूडासमावर्यस्य, विश्वविद्यालयस्य कुलसचिववर्यस्य डॉ. दशरथजादवमहोदयस्य च। कार्यक्रमस्य आरम्भः वैदिकपरम्परानुगुणं वेदमन्त्रोच्चारणेन श्रीभाविनमहोदयेन कृतः। तदनु उपस्थितानां सभेयानां शाब्दिकस्वागतं सुश्रीअपूर्वाअग्रवालमहोदया व्याहृतवती। ततः पश्चात् माननीयः कुलपतिः महानुभावानां स्मृतिचिह्नेन पुष्पगुच्छेन च स्वागतमकरोत्। तदनन्तरं कुलपतिवर्यस्य उद्बोधनमभूत्। ततः संयोजकःडॉ. जानकीशरणाचार्यः प्रास्ताविकं अपि च SSIP इत्यस्य परिचयात्मकं व्याख्यानमकरोत्। एतदनन्तरं मुख्यवक्ताडॉ. जयेन्द्रसिंहजादवः संस्कृते नवोन्मेषस्य सम्भावनाः इति विषयमादाय दृष्टान्तपुरस्सरं मार्गदर्शनम् अकरोत्। मार्गदर्शनात् परं विशिष्टव्याख्यानमभवत् श्रीजगदीशफोफण्डीमहाभागस्य। अनन्तरमागतानां जिज्ञासानां यथोचितं समाधानं विषयविशेषज्ञैः विहितम्। अन्ते च वेदविभागस्य सहायकाचार्यःडॉ. विपुलजादवमहोदयः सर्वेभ्यः धन्यतावचांसि आविष्कृतवान्। एवञ्च इयं कार्यशाला पूर्णतामन्त्रेणात्रैव सम्पन्ना। अस्याः कार्यशालायाः सञ्चालिका आसीत्–डॉ. विदुषी बोल्ला।










# विद्यावारिधि-संशोधनकार्यशाला

कार्यक्रमषट्कसमन्वितस्य युवमहोत्सवस्य उद्घाटन-कार्यक्रमे एव द्विदिवसीय- संशोधनकार्यशालायाः उद्घाटनम् अभवत्। अस्मिन् कार्यक्रमे विश्वविद्यालये विद्यावारिधौ संशोधनरतानां छात्राणां सहभागिता आसीत्। शोधच्छात्राणां मार्गदर्शनं कर्तुं दिनद्वयं यावत् पञ्चमहानुभावाः व्याख्यातृरूपेण उपस्थिताः आसन्।ते गुणवत्तायुक्तसंशोधनाय मार्गदर्शनं प्रदत्तवन्तः। युवमहोत्सवस्य समापनकार्यक्रमेण सह अस्यापि समापनम् आयोजितम् आसीत्। अस्यां कार्याशालायाम् ४७ विद्यावारिधिशोधच्छात्रैः भागः गृहीतः।



## विद्यावारिधेः षाण्मासिकं प्रगतिप्रतिवेदनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये विद्यावारिधौ संशोधनं कुर्वाणानां संशोधकानां कुते जनवरीमासस्य षष्ठे दिनाङ्के प्रगतिप्रतिवेदनकार्यक्रमस्य आयोजनम् अभवत्। ये संशोधकाः पञ्जीकृताः सन्ति ते विश्वविद्यालयस्य परिसरे समागत्य स्वकीयसंशोधनस्य प्रगतिं प्रस्तुतवन्तः। अस्मिन् कार्यक्रमे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, संशोधकानां मार्गदर्शकाः तथा संशोधकाः उपस्थिताः आसन्। सर्वेषां संशोधनप्रगतिं वीक्ष्य आवश्यकाः सूचनाः तथा मार्गदर्शनं महानुभावैः प्रादीयन्त। अस्य संयोजकरूपेण संशोधनाधिकारी डॉ. कार्तिकः पण्ड्या कार्यम् अकरोत्।




संशोधकानां मार्गदर्शनं कुर्वन् डॉ. नरेन्द्रकुमारः पण्ड्या




संशोधकानां मार्गदर्शनं कुर्वन् डॉ. ललितकुमारः पटेलः



## सम्पन्ना विद्यावारिधिकार्यशाला (Ph.D. Course Work)

विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०२०-२०२१ इति शैक्षणिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं २७-१२-२०२० च ०२-०१-२०२१ दिनाङ्के अकारि। अस्यां प्रवेशपरीक्षायां ३१ शोधार्थिनः उत्तीर्णाः अभूवन्, येषां कृते विश्वविद्यालय-अनुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला (Ph.D. Course Work) श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे ०८-०३-२०२१ तः २०-०३-२०२१ यावत् समायोजिता। अस्यां कार्यशालायां २९ शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, वेदसङ्कायप्रमुखचरःप्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमारझा, प्रो. अर्चनाकुमारीदुबे, महाविद्यालयस्य प्राचार्यःडॉ. नरेन्द्रकुमारः पण्डया, प्रो. महेन्द्रकुमारः दवे, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, डॉ. शत्रुघ्नः पाणिग्राही, डॉ. पङ्कजकुमारः रावलः, डॉ. डी.एम्. मोकरिया, परीक्षानियामकः डॉ. योगेशकुमारः पटेलः, संशोधनाधिकारी डॉ. कार्तिकपण्ड्या च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। बाह्यविशिष्टवक्तृरूपेण नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रिय-संस्कृतविश्वविद्यालयस्य प्रो. पीयुषकान्तदीक्षितः तथा च प्रो. भागीरथीनन्दः, राजकोटस्थस्य सौराष्ट्रविश्वविद्यालययस्य प्रो. सी. के, कुम्भाराणा, कर्णावतीस्थस्य गुजरातविश्वविद्यालययस्य डॉ. अतुलः भट्टः, वटोदरस्थस्य महाराजासयाजीराव-विश्वविद्यालयस्य प्रो. रबीन्द्रकुमारः पण्डा, प्रो. मयंकः त्रिवेदी तथा च डॉ. श्वेताप्रजापतिः, बनारसहिन्दूविश्वविद्यालयस्य प्रो. रमाकान्तपाण्डेयः तथा च प्रो. विनयकुमारपाण्डेयः, केन्द्रियविश्वविद्यालयस्य एकलव्यपरिसरस्य डॉ. उत्तमसिंहः, कर्णावतीस्थस्य एल्. डी. प्राच्यविद्यासंस्थानस्य डॉ. धर्मेन्द्रभट्टः, एच्. के. विनयनमहाविद्यालयस्य डॉ. रवीन्द्रः खाण्डवाला च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कार्यशालायाः संयोजनं संशोधनाधिकारी डॉ. कार्तिकः पण्डया अकरोत् तथा च सहायकरूपेण हितेषजानी कार्यमकरोत्।



विद्यावारिधिकार्यशालायाः दृश्यम्



विद्यावारिधिकार्यशालायाः शोधार्थिनः



विद्यावारिधिशोधचर्चासमितिः

## विद्यावारिधिशोधचर्चासमितिः (Research Discussion Committee of Ph.D.)

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०२०-२०२१ इति शैक्षणिकवर्षस्य कृते विद्यावारिधि-कार्यशालायाम् उपस्थितेभ्यः २९ शोधार्थिभ्यः विद्यावारिधिशोधचर्चासमितेः (Research Discussion Committee of Ph.D.) आयोजनं २२/२३-०३-२०२१ दिनाङ्कयोः परिसरे कृतम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः विद्यावारिधि-शोधचर्चासमितेः आध्यक्षं निरवहत्। २२-०३-२०२१ दिनाङ्के क्रान्तिगुरुश्यामजीकृष्णवर्मा-कच्छविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. कश्यपः त्रिवेदी विषयनिष्णातरूपेण उपस्थितः आसीत्। २३-०३-२०२१ दिनाङ्के सौराष्ट्रविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाचार्यः प्रो. राजेन्द्रचोटलिया विषयनिष्णातरूपेण उपस्थितः आसीत्। अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः तथा च प्रधानाचार्यः डॉ. नरेन्द्रकुमारः पण्डया उपस्थितौ आस्ताम्। विद्यावारिधिशोधचर्चासमितेः संयोजनं सभ्यसचिवरूपेण संशोधनाधिकारी डॉ. कार्तिकपण्डया अकरोत् तथा च सहायकरूपेण श्री हितेषजानी कार्यमकरोत्।

## Students Startup and Innovation Policy (SSIP) विषये एकः परिचयात्मकः कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये १९.०९.२०२० दिनाङ्के प्रातः ११.०० वादनात् १.०० वादनं यावत् Students Startup and Innovation Policy (SSIP) विषये एकः परिचयात्मकः कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राध्यापकाः तथा च विश्वविद्यालयसम्बद्धानां महाविद्यालयानां सप्तत्यधिकाः प्रधानाचार्याः प्राध्यापकाः च भागम् अगृह्णन्।

अस्य SSIP परिचयात्मकस्य कार्यक्रमस्य आध्यक्षं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अकुर्वन्। कार्यक्रमस्य आरम्भः मङ्गलाचरणेन जातः। तदनु व्याकरणविभागस्य प्राध्यापिकया सुश्री-विदुषी बोल्ला-वर्यया उपस्थितमहानुभावानां परिचयपुरस्सरं शाब्दिकं स्वागतं विहितम्। संस्कृतमहाविद्यालयस्य प्राचार्याः डॉ. नरेन्द्रकुमार-पण्ड्या-वर्याः अस्य कार्यक्रमस्य प्रास्ताविकं प्रास्तुवन्।

तदनु श्रीसोमनाथसंस्कृतविश्वविद्यालये SSIP योजनायाः समन्वयकः तथा च दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः गुजरातसर्वकारस्य शिक्षाविभागेन आयोजितायाः SSIP योजनायाः विषये व्याख्यानम् अकरोत्। ज्ञानप्राप्तेः लक्ष्यम् अभ्युदयप्राप्तिः निःश्रेयसप्राप्तिः च अस्ति। अतः वर्तमानपरिस्थितौ अस्माभिः तथाविधं चिन्तनं करणीयं भवति येन अस्माकं छात्राः न केवलं ज्ञानार्जनं कुर्युः परं तेन ज्ञानेन नूतनोद्योगनिर्माणे अपि समर्थाः भवेयुः। अतः अस्यां योजनायां छात्राणां कृते उद्योग-सर्जनाय नवोन्मेषणाय च सर्वकारपक्षतः आर्थिकं साहाय्यं प्रदीयते। संस्कृतक्षेत्रे अपि स्टार्ट-अप तथा च नवोन्मेषणाय बहूनि क्षेत्राणि सन्ति यत्र संस्कृतच्छात्रैः अपि उद्योगसृजनं कर्तुं शक्यते इति स्वीयव्याख्याने महोदयः उक्तवान्। व्याख्यानान्ते उपस्थितप्राध्यापकैः सहः प्रश्नोत्तरसंवादः अपि जातः। प्रासङ्गिकम् उद्बोधनं कुर्वता श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवेन डॉ. दशरथ जादव वर्येण उक्तं यत् अस्यां योजनायां न केवलं विश्वविद्यालयसंलग्नानां महाविद्यालयानां छात्राः एवं भागं गृहीतुं शक्नुवन्ति परं इतरमहाविद्यालयानां छात्राः अपि अत्र भागग्रहणं कर्तुं शक्नुवन्ति। सर्वेषां महाविद्यालयानां सहयोगेन विश्वविद्यालयः अस्मिन् उदीयमाननूतनक्षेत्रे विशिष्टं कार्यं करिष्यति।

अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः आध्यक्षीयम् उद्बोधनं कृतवन्तः। संस्कृतक्षेत्रे अपि नूतनया पद्धतया चिन्तनं जायमानम् अस्ति, तदनुगुणं कार्याणि अपि क्रियमाणानि वर्तन्ते। संस्कृतसाहित्ये निहितं ज्ञानराशिं पुरस्कृत्य नागपुरस्था काचित् महिला तादृशं जलसंसाधनविधिनिर्माणं कृतवती इति उदाहरणमपि कुलपतिमहोदयः उक्तवान्। संगणके भाषाविज्ञानम्, संस्कृत-एनिमेशन्, संस्कृते वृष्टिविज्ञानम्, वास्तुशास्त्रम्, विधिशास्त्रम्, भाषा-शिक्षणम्, आयुर्वेदशास्त्रम् इत्यादीनि बहूनि क्षेत्राणि सन्ति यत्र संस्कृतच्छात्रैः स्टार्ट-अप तथा च नवोन्मेषणं कर्तुं शक्यते। कार्यक्रमस्य अन्ते SSIP योजनायाः समन्वयकः तथा च अस्य ओनलाइन कार्यक्रमस्य संयोजकः डॉ. जानकीशरण आचार्यः सर्वान् प्रति धन्यवादज्ञानपम् अकरोत्। अस्य ओनलाइन कार्यक्रमस्य सञ्चालनं व्याकरणप्राध्यापिका सुश्री-विदुषी बोल्ला कृतवती।

